# Agnibindukritam Vishnu Stotram

# અગ્નિબિન્દુકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Agnibindukritam Vishnu Stotram

File name : agnibindukRRitaMviShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 60/25-43||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# અગ્નિબિન્દુકૃતં વિષ્ણુસ્તોત્રમ્

અગ્નિબિન્દુરુવાચ ।
ૐ નમઃ પુણ્ડરીકાક્ષ બાહ્યાન્તઃશૌચદાયિને ।
સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૨૫॥

નમામિ તે પદદ્વન્દ્વં સર્વદ્વન્દ્વનિવારકમ્ ।
નિર્દ્વન્દ્વયા ધિયા વિષ્ણો જિષ્ણ્વાદિ સુરવન્દિત ॥ ૨૬॥

યં સ્તોતું નાધિગચ્છન્તિ વાચો વાચસ્પતેરપિ ।
તમીષ્ટે ક ઇહ સ્તોતું ભક્તિરત્ર બલીયસી ॥ ૨૭॥

અપિ યો ભગવાનીશો મનઃપ્રાચામગોચરઃ ।
સમાદૃશૈરલ્પધીભિઃ કથં સ્તુત્યો વચઃ પરઃ ॥ ૨૮॥

યં વાચો ન વિશન્તીશં મનતીહ મનો ન યમ્ ।
મનો ગિરામતીતં તં કઃ સ્તોતું શક્તિમાન્ભવેત્ ॥ ૨૯॥

યસ્ય નિઃશ્વસિતં વેદાઃ સ ષડઙ્ગપદક્રમાઃ ।
તસ્ય દેવસ્ય મહિમા મહાન્કૈરવગમ્યતે ॥ ૨.૬૦.૩૦॥

અતન્દ્રિતમનોબુદ્ધીન્દ્રિયા યં સનકાદયઃ ।
ધ્યાયન્તોઽપિ હૃદાકાશે ન વિન્દન્તિ યથાર્થતઃ ॥ ૩૧॥

નારદાદ્યૈર્મુનિવરૈરાબાલબ્રહ્મચારિભિઃ ।
ગીયમાનચરિત્રોઽપિ ન સમ્યગ્યોઽધિગમ્યતે ॥ ૩૨॥

તં સૂક્ષ્મરૂપમજમવ્યયમેકમાદ્યં
બહ્માદ્યગોચરમજેયમનન્તશક્તિમ્ ।
નિત્યં નિરામયમમૂર્તમચિન્ત્યમૂર્તિં
કસ્ત્વાં ચરાચર ચરાચરભિન્ન વેત્તિ ॥ ૩૩॥

એકૈકમેવ તવ નામ હરેર્મુરારે

જન્માર્જિતાઘમઘિનાં ચ મહાપદાઢ્યમ્ ।
દદ્યાત્ફલં ચ મહિતં મહતો મખસ્ય
જપ્તં મુકુન્દ મધુસૂદન માધવેતિ ॥ ૩૪॥

નારાયણેતિ નરકાર્ણવતારણેતિ
દામોદરેતિ મધુહેતિ ચતુર્ભુજેતિ ।
વિશ્વમ્ભરેતિ વિરજેતિ જનાર્દનેતિ
ક્વાસ્તીહ જન્મ જપતાં ક્વ કૃતાન્તભીતિઃ ॥ ૩૫॥

યે ત્વાં ત્રિવિક્રમ સદા હૃદિ શીલયન્તિ
કાદમ્બિની રુચિર રોચિષમમ્બુજાક્ષમ્ ।
સૌદામનીવિલસિતાંશુકવીતમૂર્તે
તેઽપિ સ્પૃશન્તિ તવ કાન્તિમચિન્ત્યરૂપામ્ ॥ ૩૬॥

શ્રીવત્સલાઞ્છન હરેઽચ્યુત કૈટભારે
ગોવિન્દ તાર્ક્ષ્યરથ કેશવ ચક્રપાણે ।
લક્ષ્મીપતે દનુજસૂદન શાર્ઙ્ગપાણે
ત્વદ્ભક્તિભાજિ ન ભયં ક્વચિદસ્તિ પુંસિ ॥ ૩૭॥

યૈરર્ચિતોઽસિ ભગવંસ્તુલસીપ્રસૂનૈ-
ર્દૂરીકૃતૈણમદસૌરભદિવ્યગન્ધૈઃ ।
તાનર્ચયન્તિ દિવિ દેવગણાઃસમસ્તા
મન્દારદામભિરલં વિમલસ્વભાવાન્ ॥ ૩૮॥

યદ્વાચિ નામ તવ કામદમબ્જનેત્ર
યચ્છ્રોત્રયોસ્તવ કથા મધુરાક્ષરાણિ ।
યચ્ચિત્તભિત્તિલિખિતં ભવતોઽસ્તિ રૂપં
નીરૂપભૂપપદવી ન હિ તૈર્દુરાપા ॥ ૩૯॥

યે ત્વાં ભજન્તિ સતતં ભુવિ શેષશાયિં-
સ્તાઞ્છ્રીપતે પિતૃપતીન્દ્રકુબેરમુખ્યાઃ ।
વૃન્દારકા દિવિ સદૈવ સભાજયન્તિ
સ્વર્ગાપવર્ગસુખસન્તતિદાનદક્ષ ॥ ૨.૬૦.૪૦॥

યે ત્વાં સ્તુવન્તિ સતતં દિવિ તાન્સ્તુવન્તિ
સિદ્ધાપ્સરોમરગણા લસદબ્જપાણે ।
વિશ્રાણયત્યખિલસિદ્ધિદ કો વિના ત્વાં

નિર્વાણચારુકમલાં કમલાયતાક્ષ ॥ ૪૧॥

ત્વં હંસિ પાસિ સૃજસિ ક્ષણતઃ સ્વલીલા
લીલાવપુર્ધર વિરિઞ્ચિનતાઙ્ઘ્રિયુગ્મ ।
વિશ્વં ત્વમેવ પરવિશ્વપતિસ્ત્વમેવ
વિશ્વસ્ય બીજમસિ તત્પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૪૨॥

સ્તોતા ત્વમેવ દનુજેન્દ્રરિપો સ્તુતિસ્ત્વં
સ્તુત્યસ્ત્વમેવ સકલં હિ ભવાનિહૈકઃ ।
ત્વત્તો ન કિઞ્ચિદપિ ભિન્નમવૈમિ વિષ્ણો
તૃષ્ણાં સદા કૃણુહિ મે ભવજામ્ભવારે ॥ ૪૩॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે ષષ્ટિતમા- ધ્યાયાન્તર્ગતં
અગ્નિબિન્દુકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ । અધ્યાય ૬૦/૨૫-૪૩॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa . adhyAya 60/25-43..

Proofread by PSA Easwaran

*Agnibindukritam Vishnu Stotram*
pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*